SHARAT SHALINI

WEDDING

WISHES

14. Honoured as "Outstanding Teacher and Writer" by Biblioteca Pedagogica Nationala 'I.C. Petrescu' and Biblioteca Indiana, Bucharest, Romania 2001
15. Golden Prize from CESMEO, International Institute for Advanced Asian Studies, Torino, Italy, 2001.
16. Elected Fellow, Accademia di Studi Mediterrani, Academy of Mediterranean Studies, Aggrigento, Italy.
17. Royal Decoration "Most Admirable Order of the Direk Gunabhorn, 3rd Class" from His Majesty the King of Thailand, 2015.

National

18. Sahitya Akademi Award, 1968.
19. Honour from Sahitya Kala Parishad, Delhi Administration, Delhi, 1974.
20. Honour from Delhi Sikh Gurudwara Board, 1974.
21. U.G.C. National Lecturer, 1983.

नीलाचल-निवासाय नित्याय परमात्मने ।
बलभद्र-सुभद्राभ्यां जगन्नाथाय ते नमः ॥

रेभेन्सा सान्ध्यमहाविद्यालयः
कटकम्, १५.११.१९८५.

मान्या महाशयाः,

सर्वेभ्यो भूयांसि नमांसि ।

अत्रभवतां भवतां सुतस्यायुष्मतः श्रीमतः शरच्चन्द्रस्य सुशीलया आयुष्मत्या श्रीमत्या शालिन्या सार्द्धं शुभपरिणयसूचकं निमन्त्रणपत्रमासाद्य परमानन्दमाविन्दम् ।

तत्रभवतां भवतां शुभे पुत्रपरिणयस्य शुभे समुत्सवे मनसा समुपस्थाय नववधूवरयोः श्रीमतोः शालिनी-शरच्चन्द्रयोः सर्वविध-शुभ-संप्राप्त्यै सर्वान् देवान् सर्वाश्च देवीः सुतरां संप्रार्थये ।

इति ।

तत्रभवतां स्नेहाधीनः
सदाशिवः

ॐ

नीलाचल-निवासी यो नित्यः श्रीजगदीश्वरः ।
सह भ्रात्रा भगिन्या च करोतु मङ्गलं सदा ॥ १ ॥

रमया च यथा विष्णुरुमया गिरिशो यथा ।
शालिन्या श्रीशरच्चन्द्रः शोभतां सुतरां (सदा) तथा ॥ २ ॥

श्रीरामेण यथा सीता यथा कृष्णेन राधिका ।
शरच्चन्द्रेण सौम्येन शालिनी शोभतां तथा ॥ ३ ॥

शरच्चन्द्रेण शान्तेन शालिनी येन योजिता ।
संतनोतु शुभं सौख्यं सर्वपूज्यः प्रजापतिः ॥ ४ ॥

सदाशिवेन प्रार्थ्यन्ते देवा देव्यश्च नित्यशः ।
शरच्चन्द्रस्य शालिन्याः कुर्वन्तु मङ्गलं सदा ॥

~ x ~

ॐ श्रीः ॥

पूज्येभ्यश्चारुदेवेभ्यः सप्रणामं निवेद्यते ।
स्नेहाभिवादनं सोम-सत्यमेव-व्रताय वै ।

"मङ्गलं मङ्गलानां यः सोऽस्तु विवाहमङ्गलम्
जीवने नव-दम्पत्योः शरच्चन्द्रिनी-प्रश्रयोः" ।

इत्याशीः प्रेष्यते शीघ्रं चन्द्रभाल-त्रिपाठिना ॥

बर्लिन,
11 Nov., 1985

Dr. Dharmendra Kumar Gupta
Professor, Department of Sanskrit,
Punjabi University, Patiala

451, Urban Estate, Phase I
PATIALA - 147002

Date 12. 11. 1985.

परमादरणीयानामाचार्यचारुदेवशास्त्रिणामाचार्यसत्यव्रतशास्त्रिणां प्रभावतीनां च श्रीमत्युषामहाभागानां सेवायां प्रणतिपुरस्सरमावेद्यते चिरंजीविशरच्चन्द्रविवाहमंगलेनाचार्युभौ भवत्परिवारौ दिष्ट्याऽद्य वर्धेते इति शुभेऽस्मिन्नवसरे श्लोकचतुष्टयकुसुमोपहारमिममुपसमर्पयामि --

आचार्यचारुदेवस्य ज्ञानदीपात्प्रवर्तितः ।
यथा सत्यव्रताचार्यस्तथा तज्ज्ञानदीपकात् ॥
प्रवर्तितः शरच्चन्द्रः शरच्चन्द्र इवामलः ।
शालिनी-पाणिग्रहणेनाद्य दिष्ट्या स वर्धते ॥
शरच्चन्द्रान्विता नूनं शालिनी भाग्यशालिनी ।
शालिन्याऽद्य समेतोऽयं शरच्चन्द्रोऽपि भाग्यवान् ॥
भाग्यवन्ताविमौ यद्वां निजवंशसमुन्नतिम् ।
स्वधर्मनिरतौ चाथ भूत्वा भातां चिरं भुवि ॥

धर्मेन्द्र कुमार गुप्तः

-- (डा0) धर्मेन्द्रकुमारगुप्तः
पटियालास्थपंजाबीविश्वविद्यालये संस्कृतविभाग
आचार्यो भाषासंकायाधिष्ठाता च ॥

ખ્યાતા વૈદુષ્યકીર્તિઃ પ્રથિતબુધજને ચારુદેવસ્ય સૂરેઃ
સ્તુત્યસ્તસ્યાત્મજાતો મતિધનધનિકઃ પુત્રસત્યવ્રતાખ્યઃ।
તસ્યાર્હસ્યૈવ પુત્રો ગુરુગૃહવિમલો યઃ શરચ્ચન્દ્રનામા
નમ્રઃ શ્રીશાલિનીશો જગતિ વિજયતાં માતૃમોદૈકહેતુઃ॥

પિત્રોશ્ચિત્તં નિતાન્તં વરવિમલગિરા મોદમાનો નવાશઃ
શ્ચન્દ્રઃ શ્રીશાલિનીશઃ સુમતિમદવનૌ રાજતાં માન્યમૂર્તિઃ।
પુત્રો ભવ્યોભ્યસઃ ભાવનિબુધધવલ શ્ચાહદેવસ્ય પૌત્રો -
ભવ્યાં શ્રીશાલિનીં તાં પરિણયકલયા પ્રાપ્ય કાન્તાં વૃણોતુ॥

દિવ્યો દ્વાદપ્રસઙ્ગે બુધવનકમલે ભવ્યસત્યપ્રકાશો
નવ્યાશાં શાલિનીં તાં પ્રથયતુ યશસા વંશવિસ્તારહેતુમ્।
આશીર્ગોસ્વામિસૂરેર્દલયતુ કલુષં વંશવૃદ્ધિં તનોતુ
વૃદ્ધઃ શ્રીચાહદેવો લસતુ મતિમતાં માનભૂમિઃ પૃથિવ્યામ્॥

ભાવત્કઃ
મહાપ્રભુલાલગોસ્વામી

प्रेयांसः पाणिनिः,

पौत्रः श्रीचारुदेवस्य सोऽयं सत्यव्रतात्मजः,
शरच्चन्द्रभट्टारिकेण चारुणा समुदीक्षितः ॥
सा विद्याशीलसौन्दर्यशालिनीं शालिनीं सतीम्,
पत्नीत्वेन समासाद्य सुतादात्मनोऽन्वयम् ॥
बदरीनाथशुक्लस्य काशीवासिमनीषिणः,
प्राशीरनुपदं प्रोक्ता प्राप्यानेकैः मानकैः समैः ॥

आशंसकस्य
बदरीनाथशुक्लस्य

डा. सत्यव्रतशास्त्री
दिल्ली

Congratulations on Your Wedding day



श्रीः

शरद् गुणसुप्रसन्नः,
संस्कृतेन सुसंस्कृतः ।

नाम्नैव सर्वसम्पन्ना
अधुना शरत्शालिनी ।
(च्छ)

समानगुणयोस्तयोः
विवाहक्षणमंगले ।

काप्यभिख्या परा भूयात्
परमेश्वरानुग्रहात् ॥

· शुभं भूयात् ·

Sharad & Shalini

शुभास्ते सन्तु पन्थान:

Congratulations to you both
On this. your Wedding Day.
May all the things you wish yourselves
Bring added joy your way:
May every future minute
You'll share as man and wife
Be filled with. luck and gladness
To make a happy married life.

All the best.

SIDDHARTHAS.

Nov. 19, 1985.

ॐ

जोधपुरात
दीपावली, २०४२.

मया दृष्टश्शरच्चन्द्रो यः सौम्यो बाल्य संयुतः।
सोऽद्यदिष्ट्या युवा जातो दारकर्म समुद्यतः॥
वैष्णवीं यां गतः सोऽयं मया साकं पुरा मुदा।
साशक्तिस्तं सदा पायाद् पायात् सौख्यदायिनी॥
तस्मै तस्य च भार्यायै शालिन्यै शुभकामनाः।
वितरन्मोदते सोऽयं दयानन्दो भृगूद्भवः॥
चारुदेवस्य पौत्रश्च शिष्यश्चापि धियान्वितः।
कच्चित्स्मरत्यद्युनापि 'शताब्दीशब्दविग्रहम्'?
सत्यव्रतादुषस्यात्मा जात इन्दुप्रियः शशिः
चव सुखतरं चिरं [illegible] ॥

दयानन्दस्य भार्गवस्य
[illegible]



Dr Satyavrat Shastri
Professor of Sanskrit
3/54, Roop Nagar
DELHI

110007
पिन PIN

खम्भातः
२१.११.८५

दिष्ट्या वर्धन्तां सपरिवाराः
शास्त्रिमहाभागाः पौत्रविवाह-
मङ्गलेन ।

नवदम्पत्योः शालिनी-
शरच्चन्द्रयोः परमे मङ्गलमये-
स्मिन् शुभावसरे-
इमाः शुभकामनाः-

सौभाग्यमस्तु.
सौमनस्यमस्तु.
सन्तु. सर्वसम्पदः,

भवदीयो [illegible]



सेवा में

डा॰ चारुदेव शास्त्री

सुरभि 3/54, रूपनगर

दिल्ली-7

पिन 110007



Tel. : 652063

C-4/27, Safdarjang Enclave,
Hauz Khas,
New Delhi-110016.

S/o KRISHNA DATTA BHARADWAJ

१८.११.१९८५.

आदरणीया डॉ० शास्त्रिमहोदया:,

सनति निवेदनम् ।

卐।

यथा चन्द्रिकया चन्द्रो
राजते विमलेऽम्बरे ।
शरच्चन्द्रस्तथा बद्धा
शालिन्या शोभतां भुवि ॥

卐।

वशंवद:
कोशलेश भारद्वाज: ।

पुनश्च
पितृचरणानामस्वस्थतया मम अनुपस्थिति: क्षन्तव्या ।



Phone: ~~226898~~ 2916065

Sundari Siddhartha

E-2, Staff Flats
Indraprastha College
Shamnath Marg
Delhi 110054

THERE IS NO RELIGION HIGHER THAN TRUTH

मान्याः गुरुवर्याः स्नेहमयी उषाजी च .

शुभावसरेऽस्मिन् अभिनन्दनानि शुभाकांक्षाश्च शतशः स्वीक्रियन्ताम् ।

नोच्यते यत् यूनिवर्सिटी क्लब् गरीयान् न वा चौलाकुआं दवीयान् इति .

केवलं इदमेव विज्ञापनम् -

मनोरथानामगतिर्न विद्यते इति कालिदासीयम् सत्

परं शरीरस्यास्मिन् नेदं युज्यते ।

अतः मनसो पस्थितिं हृदि कुर्वन्तु इति प्रार्थयन्ती, कायानुपस्थितिं स्वभाग्यराहित्यं मन्वाना विरमाम्यहम् ।

सु. सिद्धार्थ .

18. 11. 85.



संस्कृत शोध संस्थानम्

The Institute of Indology

Phone : 3859 8.200

(Founder Chairman, Acharya Shri Diwakar Datt Sharma)
Rashtrapati Award Recipient

Bharati Vihar,
Mashobra, Simla, 171007 H. P.

No. ....   Dated 17-11-1985

Regular Publications

Divyajyoti
Sanskrit Monthly.

Amar Himachal
Hindi Weekly.

Hony. Secretary & Editor in Chief.
Prof. K. Sharma,
Shastri, M.A., M.Phil.
Sahitya Ratna.

Hony. Deputy Sec,
Satya Vrat Sharma
M. A. L.L.B.

सेवायाम्

डा. श्री [illegible] देहली ।

मान्या: ! [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ।

[illegible] च : —

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible]

[illegible] :

[illegible]

श्रीगुरुपवनपुराधीशाय पूर्णत्रयीशाय नमः ॥

अन्तर्वाणिमणयः! सहृदयवरेण्याः! कविप्रवराः!

अत्र भवन्तः श्रवसास्वान्तमवतीर्णा यद्यप्यस्माकं, तथापि संप्रति प्रत्यक्षायमाणा विराजन्ते। यतोऽत्रभवतां तनूजस्यायुष्मतः परिणीतिमहोत्सवं हेतूकृत्य प्रतिभाप्रसरणसंपूर्णा श्रीनिमन्त्रणपत्रिका तत्तनजैः प्रादर्शि अस्मद्सुहृद्वरैः डा. Prof. श्रीविझिनाथमहोदयैः। प्रायशो जनाः स्वस्याढ्यतां प्रकाशयितुकामा आङ्गल्यां निमन्त्रणपत्रिकां आरचयन्ति। न तु भारतरत्नकोषायमाणायां गैर्वाण्यां वाण्याम्। तत्रापि पद्यरूपेण सा दुर्लभतरा। तथापि विरलतमा कविता प्रतिभा विलसिता। तत्र भवदुपज्ञमेव स्यादियं सरणिः। तत एव तैः प्रादर्शि। तेनैकेनैव तोतुष्यमाणा वयं तोषनलमावेदयितुकामा लिखामः पत्रमिदम्। किञ्च भवतां पितृपादाः वर्षीयांसोऽपि प्रतिभाशाणोचितान् शास्त्रग्रन्थान् आरचयन्तीति तैर्निवेदितम्। उभाभ्यां आभ्यां आस्माकीने चेतसि अमान्तीं मुदं प्रकटीचिकीर्षवः अलिखामेदम्। अनेन साकं आस्माकीनां कांचित् काव्यतल्लजव्याख्यां तत्रभवद्भ्यः प्रेषयामः। श्रीकरुणावरुणालयः पूर्णत्रयीशो गुरुपवनपुराधीशः तत्रभवतां सकुटुम्बानामुत्तरोत्तरं श्रेयो विदध्यादित्याशास्महे ~~इति~~।

इति पण्डितराजः दामोदरपिषारकः

D Damodara Pisharody

7-11-'85

Prof. Damodara Pisharody.
C/o Dr. N. Veezhinathan.
19, I st Cross Street
C.I.T. Colony
Mylapore. Madras-600004.

To

Prof. Dr. Satyavrat Sastri.
New Delhi.

लखनऊ
73 बी सेक्टर सी
महानगर

प्रिय उषा,

खूब ढेर सारा प्यार।

तुम्हारा निमन्त्रण पत्र मिला। बहुत पुरानी स्मृति मस्तिष्क में घूम गई। तुमने ऐसे पुनीत एवं हर्ष के अवसर पर मुझे याद किया यह तुम्हारा बड़प्पन है। वास्तव में बड़े होने का यह वास्तविक चिन्ह है। मेरी ईश्वर से प्रार्थना है कि वह तुम्हें व तुम्हारे परिवार को हमेशा प्रसन्न रखे।

जीवन अत्यन्त जटिल है। फिर गृहणी के सामने तो अनेक समस्याएं आती हैं यही समस्याएं हमारी अभिन्न साथी होती हैं जो हमको एक दायरे में सिमट कर रख देती हैं। तुमने मुझे पत्र लिखकर और वह भी बड़ी स्नेह भरी शैली में गदगद कर दिया।

बेटे के विवाह के उपलक्ष में बधाई स्वीकार करना। मैं उनके सुखी दाम्पत्य-जीवन की आकांक्षा करती हूँ। दिल्ली आना बहुत कम होता है। स्वास्थ्य ठीक नहीं रहता, प्रयास करूंगी।

तुम्हारी-हम्मो।

"सरस्वती श्रुतिमहती महीयताम्"

Vidyavibhushana, Vidyasagara

Prof. M. P. L. SASTRY

Phone : 31383

91, SIXTH MAIN ROAD
MALLESWARAM
BANGALORE 560 055

6.11.85

श्रीमतां सचिवमहोदयानां श्री सत्यव्रत शास्त्रिणां

सविधे - विज्ञप्तिपरंपरा ।

कुशलानन्तरमुच्यते । सम्प्रति

भवादृशैः सादरं प्रेषितं विवाहमंगलमहोत्सवाह्वानपत्रिकां लब्ध्वा परं प्रमुदितोस्मि ।

" लोकानामवनाय पद्मजमुखैः संप्रार्थितः सादरं
पार्वत्या सहितः प्रसादमहितः कैलासशैलस्थितः ।
संतानाभ्युदयं समस्तविभवं दीर्घायुरत्युन्नतं
दंपत्योः सततं ददातु कृपया गौरीपतिः शंकरः ॥"

इत्याशंसे

भवदीयः

के दर्मेन्द्र सिंह शास्त्री